श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासरामानुजमहादेशिक (मैसूर आण्डवन्) मङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री श्रीनिवासरामानुजमहादेशिक (मैसूर आण्डवन्) मङ्गळम् ॥

आचार ज्ञान वैराग्य निधये नित्य बन्धवे।
श्रीनिवासाख्य गुरवे नमो वाकमधीमहे ॥ 1 ॥

श्रीनिवास गुरु प्राप्त शास्त्र सार्वज्ञ शालिने।
श्रीनिवास लक्ष्मणाख्याय गुरवे भूरि मङ्गळम् ॥ 2 ॥

श्रीमत्सार बुभुत्सूनां बोधाय प्रिय काम्यया।
तत्साररसार सन्धात्रे सारज्ञायास्तु मङ्गळम् ॥ 3 ॥

निवासतरवे नित्यं भक्तानां नित्यबन्धवे।
निर्णीतपरमार्थाय नित्यं भवतु मङ्गळम् ॥ 4 ॥

वादिसिंहगुरुप्रोक्त पादूस्तोत्र प्रवेशिनाम्।
हिताय भाषाव्याख्यान दायकायास्तु मङ्गळम् ॥ 5 ॥

सनकादि समानाय सन्धात्रे स्तोत्रवारिधेः।
अजात शत्रवे सर्व प्रियचित्ताय मङ्गळम् ॥ 6 ॥

राजत्फाल लसत्पुण्ड्र शोभिने शुद्धचेतसे।
रसोक्तिपूर्णकृतये कविमुख्याय मङ्गळम् ॥ 7 ॥

मानमेयरसज्ञाय मतानां मार्ग दर्शिने।
मातृकल्पाय शिष्याणां मानदायास्तु मङ्गळम् ॥ 8 ॥

नुताय सर्वैस्सततं स्थिताय आचार वर्त्मनि।
मताय सर्व लोकानां नुतरामाय मङ्गळम्॥ **9** ॥

जगद्रक्षण दीक्षस्सः रामानुजमुनिस्स्वयम्।
यद्रूपेण अवतीर्णोऽत्र तस्मै भवतु मङ्गळम्॥ **10** ॥

मुनये जित चित्ताय मुक्तिमार्ग प्रदर्शिने।
त्रिदण्ड विलसद्दोस्स्थ चतुस्सूत्राय मङ्गळम्॥ **11** ॥

नय व्याकृति शास्त्राणां वेत्त्रे ज्ञान जितारये।
मीमांसा युग्म पाथोधि मन्दरायास्तु मङ्गळम्॥ **12** ॥

ये मुक्तिकामा यस्याङ्घ्रिं प्राप्यापुः सर्वशेषिणम्।
सदा सन्तृप्त चित्ताय सर्वज्ञायास्तु मङ्गळम्॥ **13** ॥

नाधिकं ब्रुवते नाति न्यूनवाचे नय अक्षिणे।
सर्वलोक प्रियायास्तु सदा पूर्णाय मङ्गळम्॥ **14** ॥

मकारार्थ हितायैव अवतीर्णाय महात्मने।
श्रीवास लक्ष्मणाख्याय दयावारिधये नमः॥ **15** ॥

॥ इति श्री श्रीनिवासरामानुजमहादेशिक मङ्गळं समाप्तम्॥